## RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College under University of Calcutta)**

**B.A./B.Sc. FIFTH SEMESTER EXAMINATION, DECEMBER 2014**

**THIRD YEAR**

**SANSKRIT (Honours)**

Date : 23/12/2014

Time : 11 am – 3 pm

**Paper :** VI

Full Marks : 100

1. कस्यचि**देकस्य** प्रश्नस्योत्तरं लेख्यम्। [1×10]
   a) पाठ्यांशानुसारं रुद्रदेवताचारित्रिकवैशिष्ट्यं समुपस्थापनीयम्।
   b) पाठ्यांशानुसारं भूमिवैशिष्ट्यं प्रकटनीयम्।

**अथवा**

कस्यचिन् मन्त्र**द्वयस्य** वङ्गभाषया आङ्गलभाषया वानुवादो विधेयः। [2×5]

a) नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।
   अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः।
b) यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे।
   शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत्।।
c) सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।
   सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु।।
d) यस्यां पूर्वे पूर्वजना विचक्रिरे
   यस्यां देवा असुरानभ्यवर्तयन्।
   गवामश्वानां वयसश्च विष्ठा
   भगं वर्चः पृथिवी नो दधातु।।

2. कश्चि**देकः** प्रश्नः समाधेयः। [1×10]
   a) 'स एकया पृष्टो दशभिः प्रत्युवाच' – को जनः केन पृष्टः? पृच्छाविषयः कः? किमासीदुत्तरम्? [1+1+8]
   b) शुनःशेपोपाख्यानानुसारम् इन्द्रोपदेशाः संक्षेपेणोपस्थापनीयाः।

**अथवा,**

कस्यचिद् अनुच्छेद**द्वयस्य** वङ्गभाषया आङ्गलभाषया वानुवादो विधेयः। [2×5]

a) शश्वद्ध झषऽआस। स हि ज्येष्ठं व्वर्धतेऽथेतिथीं समां तदौघ आगन्ता तन्मा नावमुपकल्प्योपासासै स ओघ उत्थिते नावमापद्यासै ततस्त्वा पारयितास्मीति।
b) यावद्वै क्षुल्लका भवामो बह्वी वै नस्तावन्नाष्ट्रा भवत्युत मत्स्य एव मत्स्यं गिलति कुम्भ्यां माऽग्रे बिभरासि। स यदा तामतिव्वर्धाऽअथ कर्षूं खात्वा तस्यां मां बिभरासि।
c) तस्य ह दन्ता पेदिरे तं होवाचापत्सत वा अस्य दन्ता यजस्व माऽनेनेति, स होवाच यदा वै पशोर्दन्ताः पुनर्जायन्तेऽथ स मेध्यो भवति दन्ता न्वस्य पुनर्जायन्तामथ त्वा यजा इति ...।
d) तस्य ह विश्वामित्रो होताऽऽसीज् जमदग्निरध्वर्युर्वसिष्ठो ब्रह्माऽयास्य उद्गाता तस्मा उपाकृताय नियोक्तारं न विविदुः स होवाचाजीगर्तः सौयवसिर्मह्यमपरं शतं दत्ताहमेनं नियोक्ष्यामीति।

3. कश्चि**देकः** प्रश्नः समाधेयः। [1×10]
   a) बृहदारण्यकोपनिषदि प्रतिपादित आत्मतत्त्वलाभोपायः समुपवर्ण्यताम्।
   b) किं वा ब्रह्मस्वरूपम्? पाठ्याशानुसारं ब्रह्मस्वरूपमुपस्थापनीयम्।

4. **द्वयो**रनुवादः कार्यः वङ्गभाषया आङ्गलगिरा वा। [2×6]

a) तद् यथा पेशस्कारी पेशसो मात्रामपादायान्यन्नवतरं कल्पाणतरं रूपं तनुत एवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वाऽन्यन्नवतरं कल्याणतरं रूपं कुरुते ; पित्र्यं वा गान्धर्वं वा देवं वा प्राजापत्यं वा ब्राह्मं वाऽन्येषां वा भूतानाम्।

b) तदेव सक्तः सह कर्मणेति लिङ्गं मनो यत्र निषक्तमस्य।
प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम्। तत्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मण इति नु कामयमानोऽथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति।

c) सा होवाच मैत्रैयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्, स्यां न्वहं तेनामृताहो नेति, नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति।

d) स यथा सैन्धवघनोऽनन्तरोऽवाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्मानन्तरोऽवाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति। न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः।

5. कश्चि**देको** मन्त्रः सप्रसङ्गं व्याख्येयः। [1×8]

a) यस्यानुवित्तः प्रतिबुद्ध आत्माऽस्मिन् संदेह्ये गहने प्रविष्टः।
स विश्वकृत् स सर्वस्य कर्ता तस्य लोकः स उ लोक एव।।

b) आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्।

6. कश्चि**देकः** प्रश्नः समाधेयः। [1×12]

a) याज्ञवल्क्यमतानुसारम् ऋणादाननीतयः सम्यक् सविशदमालोचनीयाः।

b) स्त्रीधनविषये याज्ञवल्क्यमतं मिताक्षराम् अनुसृत्य स्फुटीकरणीयम्।

7. कश्चि**देकः** श्लोकः सप्रसङ्गं व्याख्येयः। [1×7]

a) स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्।।

b) पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी।
परेण भुज्यमानाया धनस्य दशवार्षिकी।।

8. विषय**द्वयम**वलम्ब्य संक्षिप्तटिप्पणी**द्वयं** रचनीयम्। [2×3]

a) आधिः b) व्यवहारः c) प्राड्विवाकः d) साहसम्

9. कश्चि**देकः** प्रश्नः समाधेयः। [1×10]

a) मनुसंहितायाः सप्तमाध्याये राज्ञ उत्पत्तिमधिकृत्य यथाभिहितं तद् वर्णनीयम्।

b) धर्मशास्त्रेतिहासे नारदसंहितायाः अवदानमालोचनीयम्।

10. यस्य कस्यापि त्रितयस्य टिप्पणी लेखनीया। [3×5]

a) शूलपाणिः b) रघुनन्दनः c) कुल्लूकभट्टः d) पराशरसंहिता

e) जीमूतवाहनः f) मिताक्षरा

———— × ————